JETIR.ORG ISSN: 2349-5162 | ESTD Year : 2014 | Monthly Issue
JOURNAL OF EMERGING TECHNOLOGIES AND INNOVATIVE RESEARCH (JETIR)
An International Scholarly Open Access, Peer-reviewed, Refereed Journal

# नैषधीयचरितमहाकाव्ये प्राणिविज्ञानम्

*डा. नीलाम्बरबाघः*
**सहायकाचार्यः,साहित्यविभागः,**
**श्रीजगन्नाथसंस्कृतविश्वविद्यालयः श्रीविहारः, पुरी, ओडिशा।**

## *उपक्रमः-*

महाकविश्रीहर्षः प्रकाण्डविद्वान् तु आसीत् एव साहित्य-न्याय-तर्कादि विषयेषु सः समाना ज्ञाताऽसीत् तेन सह वेदाङ्ग-षड्दर्शन-संगीत-गणीत-आयुर्वेद-धनुर्वेद-सामुद्रिकविद्या-ज्यौतिष-पुराण-नीतिशास्त्रेषु अपि विशिष्टपाण्डित्यमावहति। इत्थं प्राणिविज्ञानस्यापि ज्ञाताऽसीत् सः।

## *विषयोपस्थापनम्-*

नैषधीयचरितमहाकाव्ये जल-स्थल-आकाशसम्बद्धितानां प्राणिनामुल्लेखः वर्त्तते। प्रथमसर्गे अश्वसम्बद्धि वर्णनं श्रीहर्षः करोति तेन शालिहोत्रस्य ज्ञाता इति आत्मानं साधयति। प्रथमसर्गे अश्वलक्षणं, अश्वस्वभावं,अश्वगतिं च साधु वर्णयति महाकविश्रीहर्षः।

### अश्वलक्षणं यथा-

" अथान्तरेणावटुगामिनाऽध्वना निशीथिनीनाथमहस्सहोदरैः।
निगालगाद् देवमणेरिवोत्थितैर्विराजितं केसरकेश्ररश्मिभिः॥" [१]

अर्थात्- तदनन्तरं निशीथिनीनाथमहः सहोदरैः निगालगात् देवमणेः आन्तरेण अवटुगामिना अध्वना उत्थितैः इव केसरकेशरश्मिभिः विराजितं..( तं हयं नलः आरुरोह )।

### पुनश्च –

अजस्रभूमीतटकुट्टनोद्गतौ रुपास्यमानं चरणेषु रुणुभिः।
रयप्रकर्षाध्ययनार्थमागतौर्जनस्य चेताभिरिवाणिमाङ्कितैः॥[२]

इत्थं चतुषष्ठिश्लोकपर्यन्तम् अश्वलक्षणं वर्णितमस्ति ।

### अश्वगतिः यथा-

द्विषद्भिरेवास्य विलङ्घिता दिशो यशोभिरेवाब्धिरकारि गोष्पदम्।
इतीव धारामवधार्य्य मण्डली क्रियाश्रियाऽमण्डि तुरङ्गमैः स्थली ॥[३]

### अर्थात्-

अस्य द्विषद्भिः एव दिशः विलङ्घिताः अस्य यशोभिः एव अब्धिः गोष्पदम् अकारि इति इव तुरङ्गमैः धाराम् अवधीर्य मण्डलीक्रियाश्रया स्थली अभूषि ।

**यथा वा-**

प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायनाम् ।
इतीव वाहैर्निवेगदर्पितैः पयोधिरोधक्षममुत्थितं रजः ॥[४]

**अर्थात्-**

इयं धरा अस्माकं प्रस्थातुं कियत् गन्तव्यं स्थानम् अर्थात् किञ्चित् पर्याप्तम् अतः तत् पयोधिः अपि भूरेव भवतु -इति इव निजवेगदर्पितैः नलाश्वैः समुद्रच्छादेन पर्याप्तं रजः उत्थापितम् ।

**अश्वस्वभावः यथा-**

हरेर्यदक्रामि पदैककेन रवं पदैश्चतुर्भिः क्रमणेऽपि यस्य नः ।
त्रपा हरीणामिति नम्रिताननैर्न्यवर्ति तैरर्धनभः कृतक्रमैः ॥ [५]

**अर्थात्-**

यत् रवं हरेः एककेन पदाम् अक्रामि तस्य चतुर्भिः पदैः अपि क्रमेण नः हरिणां त्रपा- इति नम्रिताननैः अर्द्धनमः कृतक्रमैः तैः निवर्तितम् ।

नैषधीयचरितमहाकाव्ये प्रथमसर्गे श्लोकसंख्या ११७ तः १४४ पर्यन्तं वर्णितः हंसप्रसङ्गः पक्षिविज्ञानस्य परिचायकोऽस्ति ।

महाकाव्येऽस्मिन् मयूरस्य वर्णना [६] , कोकिलस्य वर्णनं [७], शुकस्य वर्णनं [८] । अन्येषां पक्षिणां च वर्णनं दृश्यते । जलचरमीनसम्बद्धः उल्लेखः नेत्राणाम् उपमात्वेन अस्त्येव । मीनप्रकृतेः निरीक्षणमपि काव्येऽस्मिन् वर्त्तते ।

**यथा-**

पिकरुतश्रुतिकम्पिनि शैवलं हृदि तया निहितं विचलद्बभौ ।
सतततद्गतहृच्छयकेतुना हतमिव स्वतनूघनघर्षिणा ॥[९]

***उपसंहारः-***

उपरोक्तेषु स्थलेषु प्राणिविषयकवर्णनघटितत्वात् महाकविश्रीहर्षः प्राणिषु विशिष्टं ज्ञानं स्थापयति स्म इति महाकविः प्राणिविज्ञानी इति निःसन्देहं वक्तुं शक्यते ।

***पादटीकाः-***

१. नैषधीयचरितमहाकाव्यम् १/५८
२. तत्रैव १/५९
३.तत्रैव १/७२
४.तत्रैव १/६९
५. तत्रैव १/७९
६. तत्रैव १/१०२
७. तत्रैव १/१००,१०२,१०४
८.तत्रैव १/१०३,१०४
९. तत्रैव ४/३५